International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(3): 336-338
© 2017 IJSR
www.anantaajournal.com
Received: 24-03-2017
Accepted: 25-04-2017

**डॉ. विश्वेश्वरपाणिग्राही**
संस्कृतबिभागाध्यक्ष:,
प्रभातकुमारमहाबिद्यालय:, काथि:

**Correspondence**
**डॉ. विश्वेश्वरपाणिग्राही**
संस्कृतबिभागाध्यक्ष:,
प्रभातकुमारमहाबिद्यालय:, काथि:

# बाक्यपदीये ब्रह्मस्बरुपम्

**डॉ. विश्वेश्वरपाणिग्राही**

शतकत्रयादिग्रन्थानां रचयिता सर्वतन्त्रस्वतन्त्र: सकलसंस्कृतवाङ्मयतत्वज्ञ: सर्वशास्त्रेषु निबन्धकृत: बावयपदीयग्रन्थस्य कर्ता भर्तृहरि: कदा कुत्रेमां पवित्रभारतभूमिमलंचकार इत्यस्मिन् विषये किमपि निश्चितं प्रमाणं नोपलभ्यते । तथापि इतस्ततोऽन्वेषणात् उपलब्धाभि: सामग्रीभि: गुरुपरम्परया प्रसिद्धिमुपगताभि: किंवदन्तीभिश्च यत् निर्धारितं तदेवात्र निबध्यते। बामन-जयादित्य-सोमानन्द-हेलाराज-पुण्यराज-अभिनबगुप्त-कल्हणादयो बिद्वांस: काश्मीरबासिन: आसन् । एतै: बिद्बद्भि: भर्तृहरि: समादृत: आसीदितिकृत्बा असौ काश्मीरनिबासी आसीत् । " "" " भर्तृहरे:समय:-

सर्वतन्त्रस्वतन्त्रस्य वैयाकरणमूर्द्धण्यस्य भर्तृहरे; जन्मादिविषये किमपि दृढतरं प्रमाणं नास्ति। एवञ्च एतद्विषयकमितिवृत्तं याथार्थत्बेन नोपलभ्यते। संस्कृतवाङ्मये विशिष्टानां स्वनामधन्यानां पण्डितप्रवराणां जीवनवृत्तविषये ईदृश्येव स्थितिरस्ति। सोऽयं संसारमसारं मत्वा स्वजीवनलेखने सर्वेऽप्रवृत्ता आसन्। अयं तेषां स्वभाव: भर्तृहरिणाऽपि मार्गोऽयमनुसृत:। अतो यद्यपि तस्य जीवनकालनिर्णयं कर्तुं न शक्यते, तथापि कैश्चित्प्रमाणैर्निर्णेतुं शक्यते। अधुना एतद्विषये कानिचित्प्रमाणानि समुपस्थाप्यन्ते।

भत्तृहरिणा पतञ्जले: महाभाष्यग्रन्थस्य दीपिकाटीका बिरचितबान् ।

अत: तस्य जन्मकाल: पतञ्जले: परं स्यादित्यनुमीयते ।बामनजयादित्यौ काशिकाबृत्तौ बाक्यपदीयम् शब्दार्थसम्बन्धीव्याकरणमित्युच्यते । अस्मात् ज्ञायते काशिकाकारस्य पूर्बमस्य जन्मकाल: आसीदिति । आधुनिकैतिहासिकबिदुषां मतानुसारं ४०० ख्रीष्टपूर्बमिति ज्ञायते ।

**भत्तृहरे: कृतय**

सर्वशास्त्रमर्मज्ञ: भत्तृहरि: व्याकरणशास्त्रे तथा अन्येष्वपि साहित्य-पुराण-योग-दर्शन-धर्मशास्त्रादिषु महत्वपूर्णान् ग्रन्थान् टीकाश्च व्यरचयत्। भत्तृहरिणा नवग्रन्था: व्याकरण-साहित्य-दर्शनप्रभृतिषु विषयेषु प्रणीता:। अनेन लिखितानां सर्वेषां ग्रन्थानामुपलब्धिविषयेऽद्यापि सम्यग् ज्ञानं न जातम्। किन्तु एतन्नाम्नोपलब्धानां ज्ञातानामपि ग्रन्थानां सृष्टाबिषये बिबादो वर्त्तते। महाभाष्यदीपिका-बावयपदीयम्-बाक्यप दीयबृत्ति-शतकत्रय-जैमीयमीमांसाबृत्ति-बेदान्तसूत्रबृत्ति-शब्दधातुबृत्ति-भट्टिकाब्य-भागबृत्तिप्रभृतयो अस्य बैदुष्यं प्रतिपादयति ।

यथा आचार्यशङ्कर: बिश्बमिदं ब्रह्मण; बिबर्त्तनमित्यभिहितम् । तथैब भर्तृहरिणापि बिश्बमिदं शब्दब्रह्मण: बिबर्त्तनमित्युक्तम् । बक्यपदीयग्रन्थस्य ब्रह्मकाण्डस्य प्रथमकारिकायां बिबर्त्तते इत्यस्य पदेन शब्दब्रह्मण: बिबर्त्तनं न तु परिणाम: इति तस्याशय: । अत: भर्तृहरि: शब्दबिबर्त्तनबादस्य प्रबर्त्तक: न तु शब्दपरिणामबादस्य ।

भर्तृहरि: यं ब्रह्म इत्यभिहितम् । स स्फोटात्मक: स्थुलशब्दो नास्ति अपि तु स्फोटात्मको नित्यशब्द: । एब्म्भुतस्य स्फोटात्मकस्य ब्रह्मण: स्बरुपं बावयपदीयग्रन्थस्य ब्रह्मकाण्डे सबिशदमालोचनं कृतम् । शब्दात्मकस्य शब्दब्रह्मण: स्बरुपनिरुपणमेब ब्रह्मकाण्डस्य प्रतिपाद्यबिषय: । यद्यप्याचार्य: भर्तृहरि: शब्दतत्बं प्रतिपादयितुमत्र प्रयत्न: कृत: तथापि औपनिषद: ब्रह्मण: स्बरुपमप्यत्र सम्बन्ध्यते । प्रसङ्गेऽस्मिन् महाबैयाकरणेन भट्टोजीदीक्षितेन शब्दकौस्तुभग्रन्थे उक्तम् -तदेबत् बराटिकाण्बेषणाय प्रबृतश्चिन्तमणिं लब्धबिनिति बासिष्ठरामायणोक्ताभाणकन्यायेन शब्दबिचाराय प्रबृत्त: सन् प्रसङ्गाद्द्वैत औपनिषदे ब्रह्मण्यपि ब्युत्पद्यतामित्यभिप्रायेण भगबान् भत्तृहरिबिबर्त्तबादादिकमपि प्रसङ्गात् ब्युत्पादयत्। यामुनाचार्योऽपि सिद्धित्रयग्रन्थे भत्तृहरिं ब्रह्मसूत्रस्य ब्याख्याकारेषु श्रेष्ठ इति प्रतिपादितम् । यथा- तथापि आचार्य्यटन्ङ-भर्तृप्रपञ्च-भर्तृमित्र-भर्तृहरि–ब्रह्मदत्त-शङ्कर-श्रीबत्साङ्क-भास्करादिबिरचित-सितासित-बिबिधनिबन्धश्रद्धाबिप्रलब्ध-बुद्धयो न यथान्यथा च प्रतिपद्यन्त इति तत्प्रतित्तये च युक्त: प्रकरणप्रक्रम: ।

एकमेबाद्धितीयम्, अद्वैत एक एबाभबत्, सलिल एबैकद्रष्टा इत्यदिषु श्रुतिबाक्येषु अद्वितीयब्रह्मण: स्बरुपमुद्घोषितम् । अबिद्याज्ञानेन ब्रह्मण: भिन्नत्वं प्रतीयते । किमर्थमिति प्रश्ने भर्तृहरिणा उच्यते । भिन्नं शक्तिब्यपाश्रयात् । श्रुतिशास्त्रे : भिन्ना: । तस्या: आधार: शब्दब्रह्मोऽपि भिन्नरुपेण प्रतीयते । बस्तुत; शब्दब्रह्म अभिन्नरिति । परमार्थसारकारिकायामुच्यते –

निजशक्तिबैभबभराद् अखण्डचतुष्टयमिदं बिभागेन ।
शक्तिमाया प्रकृति: पृथ्बी चेति प्रभाबितं प्रभुणा ।।(१)

भत्तृहरिप्रमुखा: बैयाकरणा अद्वैतबादिन: । तेषां सिद्धान्तानुसारं भोक्ता,भोग्य:,भोग: इत्यस्य त्रिबिधस्य पदार्थस्य सत्ता नास्ति । तत्र अद्वैतशब्दतत्बमेब सत्यम् । सस्तु बिभिन्नशक्त्या भोक्ता-भोग्य-भोगभेदेन बिबर्तते । अबिद्ययाच्छन्नस्य जीबस्य भोगसम्पादनाय परमतत्बं शब्दब्रह्मण: भेदो रुपेण प्रतीयते ।भत्तृहरिणा स्बपञ्चटीकायामुक्तम्- एकस्य हि ब्रह्मण: तत्बान्यत्बाभ्यां सत्बासत्बाभ्यां चानिरुक्ताबिरोधिशक्त्युपग्राह्यस्यासत्यरुप-प्रबिभागस्य स्बप्नबिज्ञान-पुरुषबदबहिस्तत्बा: परस्परबिलक्षणा भोक्तृ-भोक्तब्य-भोगग्रन्थयो बिबर्तन्ते । प्रसङ्गेऽस्मिन् महाकबिकालिदासस्य कुमारसम्भबस्य कारिकेयं साम्यत्बं भजते ।
त्बमेब हब्यं होता च भोज्यं भोक्ता च शाश्बत:।
बेद्यं च बेदिता चासि ध्याता ध्येयं च यत् परम् ।। भगबता श्रीकृष्णेन श्रीमद्भगबद्गीतायामुक्तम् –

ब्रह्मार्पणं ब्रह्म हबिर्बह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैब तेन गन्तब्यं ब्रह्मकर्म समाधिना ।।

परिदृश्यमानस्य बिश्बप्रपञ्चस्य यानि बैचित्र्याणि दृश्यन्ते । तेषां मूलं ताबत् जन्मादयो षट् भाबबिकारा: । महर्षिणा यास्केन निरुक्तग्रन्थे स्पष्टीकरणं कृतम् । षट्भाबबिकारा: भबन्तीति ह स्माह भगबानबार्ष्यायणि: ।(२) जायते अस्ति बिपरिणमते बर्धते अपक्षीयते बिनश्यतीति । अथान्ये भाबबिकारा एतेषामेब बिकारा: । महाभाष्यकृता श्रीमता पतञ्जलिना बार्ष्यायणेरभिमतं स्बीकृतम् । अत: श्रीमता भर्तृहरिणा उक्तम्- गुणभूतैरबयबै: समूह: क्रमजन्मनाम् ।
बुद्ध्या प्रकल्पिता भेद: क्रियेति ब्यपदिश्यते ।।(३) बस्तुत: कालस्ताबत् शब्दब्रह्मण: स्बातन्त्राख्यशक्ति: । शब्दब्रह्म कालशक्तिप्रभाबेन जन्मादयो षट्बिकारा: सहयोगेन बिश्बस्य बैचित्र्याणि ससर्ज । यद्यपि काल अखण्ड एकस्तथापि उपाधिबशादसौ बर्तमान-अतीत-भबिष्यदिति भेदेन तिबिधकल्पनं भबति । येन काले भेदो आरोप्यते । इदं ताबत् सृष्टे: रहस्यम् । आचार्यभत्तृहरिणा बाक्यपदीयग्रन्थस्य प्रकीर्णकान्डे कालसमुद्देशबिभागे कालस्य स्बरुपं दाशर्यनिकदृष्ट्या बिबेचनं कृतम् । यथा- उत्पत्तौ च स्थितौ चैब बिनाशे चापि तद्वताम् ।

निमित्तं कालमेबाहुर्बिभक्तेनात्मनास्थितम् ।।
तमस्य लोकयन्त्रस्य सूत्रधारं प्रचक्षते ।
प्रतिबन्धाभ्यनुज्ञाभ्यां तेन बिश्बं बिभज्यते ।।
यदि न प्रतिबध्नीयात् प्रतिबन्धं च नोत्सृजेत् ।
अबस्था ब्यतिकीर्येरन् पौर्बापौर्यबिनाकृता: ।।
प्रतिबन्धाश्च यास्तेन चित्रा बिश्बस्य बृत्तय: ।
ता: स एबानुजानाति यथा तन्तु: शकुन्तिका: ।।(४)

शब्दब्रह्मणा सह सायुज्यप्राप्ते: सरणि: बेद: । बेदे ब्रह्मप्राप्त्युपाय: बर्णनमस्ति । ब्रह्मप्राप्तिबिषये सर्बेषां मतभेदोऽपि दृश्यते । श्रीमता भर्तृहरिणा स्बपञ्चटीकायां ब्रह्मप्राप्तये दशबिधानि बिकल्पानि उल्लिखितानि । यथा- (१) ममाहमित्यहङ्कारगन्थि-समतिक्रममात्रं ब्रह्मण: प्राप्ति: (२) बिकाराणां प्रकृतिभाबापत्तिरित्यपरे (३) बैकरण्यम् (४) असाधना परितृप्ति: (५) आत्मतत्बम् (६) आत्मकामत्बम् (७) अनागन्तुकार्थत्बम् (८) परिपूर्णशक्तित्बम् (९) कालबृत्तनामात्ममात्रास्बसमाबेश: (१०) सर्बत्मना नैरात्म्यमिति प्राप्ति-बिकल्पा: । ब्रह्मप्राप्तिबिषये उपनिषदि ,सांख्य-योगादिदर्शनशास्त्रे यद्यपि बिभिन्ना: दार्शनिका: तेषां दार्शनिकतत्बदृष्ट्या भिन्ना: मतबादा: उपस्थापयन्ति । तथापि तेषां सर्बेषामाकर: बेद एब । महिम्नस्तोत्रे उल्लेखमस्ति यत् –- त्रयी सांख्यं योग: पशुपतिमतं बैष्णबमिति/ प्रभिन्ने प्रस्थाने परमिदमद: पथ्यमिति च । रुचिनां बैचित्र्यादृजुकुटिलनानापथयुषां/नृणामेको गम्यस्त्बमसि पयसामर्णब इब ।।(५)

यथारुचि यथार्थित्बं यथाब्युत्पत्ति भिद्यते ।
आभासोऽप्यर्थ एकस्मिन्ननुसन्धानसाधित: ।।(६)

बेदो शब्दब्रह्मण: प्रतिबिम्बमिब । तदेब शब्दतत्बं ऋषय: द्रष्टुं समर्था: । येषां तदुपलब्धे: योग्यता नास्ति । तेषां कृते ऋषय: बेदेषु उपस्थापितम् । बस्तुत: बेद एक एब । मन्त्रद्रष्टार: ऋषय: तस्य संहिता -पद-क्रमादिमाध्यमेन बिभज्य बिभिन्नाभि: शाखाभि: प्रचारितबन्त: । स्थुलबुद्धिम्पन्नानां मानबानां सौकर्य्यसम्पादनाय क्रमानुसारं एतेषां बिभिन्नत्बं कृतम् । प्रधानत: बेदस्य ऋक्-साम-यजु अथर्ब इति चत्बार: भेदा: सन्ति । पुनश्च तेषामनेका: शाखा: सन्ति । परन्तु बेदस्य अनेका: शाखा: सत्बेपि परंब्रह्मण: अभिन्नत्बं प्रतीयते । सर्बशाखाप्रत्ययमेकं कर्म ।तद्यथा सर्बभिषक्शाखाप्रत्ययमेकं चिकित्सितम् । मनुसंहितायां मनुना उक्तम्-बेदोऽखिलधर्ममूलम्। बेदाद् धर्मो हि निर्बभौ....। स्मृतिशास्त्रे प्रतिपादितानि बिधानानि बेदादेब संगृहीतम् । बेदार्थोपनिबन्धृत्बात् प्राधान्यं हि मनो: स्मृतम् ।

मन्बर्थबिपरिता या सा स्मृतिर्न प्रशस्यते ।।

स्मृतिशास्त्रे प्रतिप्रादितानि प्रामाण्यानि बेदप्रामाण्यै: प्रतिष्ठितम् । अत: प्रत्यक्षभाबेन भबतु अथबा परोक्षभाबेन सर्बेषां स्मृतिशास्त्राणां मूलं बेद एब । अस्मिन् बिषये प्रमुखाणामाचार्यानामभिमतमपि दृश्यते । स्मृतिशास्ताणामुदाहरणत्बेन चरक:,सुश्रुतादयो प्रमुखाणामाचार्याणां चिकित्साशास्त्रं तथा उसनश् प्रमुखाणां नीतिशास्त्रप्रणेतृणामर्थशास्त्रं प्रमुखस्थानं भजते । स्मृतिशास्त्रेषु अदृष्टप्रयोजनानि लक्ष्यते । यथा भक्ष्याभक्ष्य:, गम्यागम्य: बिषयमाश्रित्य पञ्चपञ्चानखा: भक्ष्या:,मांस भक्षयितामूत्र यस्य...... ।
कुमारिलभट्टै: तन्त्रबार्त्तिकब्याख्यायामुक्तम्- बिज्ञानबाद:, क्षणभङ्गबाद:, नैरात्मबादादि दार्शनिकतत्बं उपनिषद: संगृहीतमिति स्पष्टम् । यथा बिज्ञानमात्र-क्षणभङ्ग-नैरात्मादिबादानामप्युपनिषदर्थ बादप्रभबत्बं बिषयेष्बात्यन्तिकं रागं निबर्तयितुमित्युनपन्न सर्बेषां प्रामाण्यम् ।(७) श्रीमद् भगबद्गीतायां यामिमां पुष्पितां बाचं इत्यस्य श्लोकस्य ब्याख्यानप्रसङ्गे आचार्यमधुसूदनेन उक्तम् –- के येऽबिपश्चित: बिचार-जन्य-तात्पर्यपरिज्ञानशून्य: । अतएब बेदबादरता:। बेदे ये सन्ति बादा: अर्थबादा: अक्षय्यं ह बै चर्तुमास्ययाजिन: सुकृतं भबति इत्येबमादयास्ते एब रता; बेदार्थसत्यत्बेनैब एकमेबैतदिति मिथ्याबिश्बासेन सन्तुष्टा: ... । सत्य:, बिशुद्ध:,ॐकाररुप:, ऐकपदेनप्रतिपाद्य: सर्बेषामतबादानामबिरोधी बिद्या नाम ब्रह्म बेदे प्रतिपादितम् । अत: हरिणा उक्तम् –

सत्या बिशुद्धिस्तत्रोक्ता बिद्यैबैकपदागमा ।
युक्ता प्रणबरुपेण सर्बबाधाबिरोधिनी ।।(८)

ब्रूह्मरुपबिद्यायाः यो प्रणबः ॐकारः उपनिषत्सु भिन्नरुपेण कीर्त्तितमस्ति । भगबद्गीतायां ॐकारं ब्रूह्मणः बाचकमिति प्रतिपादितम् । तद् यथा-ॐमित्येकाक्षरं ब्रूह्म ब्याहरन् मा मनुस्मरन् । ऐतरेयोपनिषदि ताबत् —-गिरामस्मैकमक्षरम्।।ॐतत्सदिति निर्देशो ब्रूह्मणस्त्रिबिधः स्मृतः । प्रणबः सर्बबेदेषु । पातञ्जलयोगसूत्रे प्रणबमीश्बरस्य बाचकरुपेण स्पष्म् । महाकबिना कालिदासेन रघुबंशे प्रोक्तम् ।

बैबस्बतो मनुर्नाम माननीयो मनीषिणाम् ।
आसीन्म्हीक्षितामाद्यः प्रणबश्छन्दसामिब ।। कुमारसम्भबे ताबत् -—
उद्घात; प्रणबो यासां न्यायैस्त्रीभिरुदीरणम् ।

कर्म यज्ञः फलं स्बर्गस्तासां त्वं प्रभबो गिराम् ।(१०) भबभुतिना उत्तररामचरिते ब्रूह्मणः स्बरुपं बिषये उल्लिखितम्-

एको रसः करुण एब निमित्ताभेदात्
भिन्नः पृथक् पृथगिबाश्रयते बिबर्त्तान् ।
आबर्त्त-बुद्बुद-तरङ्गमयान् बिकारा-
न्नम्भो यथा सलिलमेब तु तत् समग्रम् ।।मनुसंहितायां मनुना उक्तम् —

एकाक्षरं परंब्रूह्म इति ।(१०) अतएब अस्माभिः प्रतिपादयितुं शक्यते यत् भर्त्तृहरिणा बाक्यपदीयग्रन्थे ब्रूह्मकान्डे शब्दब्रूह्मणः स्बरुपं बिषये यदुपस्थापितं तत्तु सर्बैः बिद्बद्भिरङ्गीकृतम् ।

**पादटिप्पणी**

1. निजशक्तिबैभब.....। अभिनबगुप्तः-परमार्थसारकारिका ।
2. निरुक्तम् ।१.२
3. बाक्यपदियम् ।३.८.४
4. ऐतरेयोपनिषद् । १५
5. महिम्नस्तोत्रम् ।श्लोकसंख्या -४
6. उत्पलाचार्यः ।श्रीप्रभ्यभिज्ञा
7. तन्त्रबार्त्तिकब्याख्या -—पृष्ठा .१६८
8. बाक्यपदीयम् -—ब्रूह्मकाण्डम्-९कारिका
9. कुमारसम्भबम्-२.१२
10. मनुसंहिता -२.८३—

**सहायकग्रन्था**

1. भत्तृहरिः-स्बोपज्ञटीका
2. हरिबृषभबृत्तिः-पण्ड़ितरघुनाथशर्मा
3. अम्बाकर्त्रीब्याख्या-पण्डितसूर्यनारायणशुक्लः
4. मनुसंहिता -बङ्किमचन्द्रप्रधानः
5. श्रीमद्भगबद्गीता-मधुसूदनदत्तः
6. बाक्यपदीयम्-अनुबादग्रन्थः-के.ए.एस् लायार्